## ।। श्री करावलम्बन स्तोत्रम् ।।

त्रय्या विकासकमजं मुहुरन्तरेव
सञ्चिन्त्य मध्वगुरुपादयुगं गुरूंश्च ।
वेदेशपादजलजं हृदि साधु कृत्वा
सम्प्रार्थये श्रुतिविकासकहस्त दानम् ।। 1
पद्मासनादिसुरसत्तमभूसुरादि-
सल्लोकबोधजजने बदरीनिवासिन् ।
सच्छास्त्रशस्त्रहृतसत्कुमते सदिष्ट
वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 2
आम्नायविस्तरविशारद शारदेश
भूताधिपादिसुरसंस्तुत पादपद्म ।
योगीश योगिहृदयामलकञ्जवास
वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 3
सद्ब्रह्मसूत्रवरभारततन्त्रपूर्व-
निर्माण निर्मलमतेऽखिलदोषदूर ।
आनन्दपूर्णकरुणाकर देवदेव
वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 4
अर्कात्मजाजलतरङ्गविचारिचारु-
वायूपनीतशुभगन्धतरूपवासिन् ।
अर्कप्रभैणवरचर्मधरोरुधामन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 5

तर्काभयेतकर तात शुकस्य कीट-

राज्यप्रदाघटितसङ्कटकात्मशक्ते ।

भृत्यार्तिहन् प्रणतपूरुसुवंशकारिन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 6

काले जले जलदनील कृतोरुवर्मन्-

आम्नायहारिसुरवैरिहरावतार ।

मत्स्यस्वरूप कृतकञ्जजवेददान

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 7

गीर्वाणदैत्यबललोलितसिन्धुमग्न-

मन्थाचलोद्धरण देव सुधाप्तिहेतोः ।

कूर्मस्वरूप धृतभूधर नीरचारिन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 8

क्षोणीहरोरुबलदैत्यहिरण्यनेत्र-

प्रध्वंसदंष्ट्रयुगलाग्रसुरप्रमोद ।

पृथ्वीधराध्वरवराङ्ग वराहरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 9

प्रह्लादशोकविनिमोचन देवजात-

संतोषदोरुबलदैत्यहिरण्यदारिन् ।

सिंहास्यमानुषशरीरयुतावतार

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 10

देवेन्द्रराज्यहरदानवराजयज्ञ-

शालार्थिरूपधर वज्रधरार्तिहारिन् ।

याञ्चामिषादसुरवञ्चक वामनेश

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 11

तातापकारिनृपवंशवनप्रदाह-

वह्ने भृगुप्रवर राम रमानिवास ।

सूर्यांशुशुभ्रपरशुप्रवरायुधाढ्य

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 12

रक्षोधिराजदशकन्धरकुम्भकर्ण-

पूर्वारिकालन मरुद्वरसूनुमित्र ।

सीतामनोहर वराङ्ग रघूत्थराम

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 13

कृष्णाप्रियाप्रियकरावनिभारभूत-

राजन्यसूदन सुरद्विजमोददायिन् ।

भैष्मीपुरःसरवधूवरकेलिकृष्ण

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 14

सद्धर्मचारिजिनमुख्यसुरारिवृन्द-

सम्मोहन त्रिदशबोधन बुद्धरूप ।

उग्रादिहेतिनिचयग्रसनामितात्मन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 15

ज्ञानादिसद्गुणविहीनजनप्रकीर्ण-

काले कलेस्तुरगवाहन दुष्टहारिन् ।

कल्किस्वरूप कृतपूर्वयुगप्रवृत्ते

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 16

यज्ञैतरेयकपिलर्षभदत्तधन्वं-

तर्यश्वसन्मुखकुमारसुयोषिदात्मन् ।

सद्धर्मसूनुवर तापस हंसरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 17

सत्केशवादिद्विषडात्मकवासुदेवा-

द्यात्मादिना सुचतुरूप सुशिंशुमार ।

कृद्धोल्कपूर्वकसुपञ्चकरूप देव

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 18

नारायणादिशतरूप सहस्ररूप

विश्वादिना सुबहुरूप परादिना च ।

दिव्याजिताद्यमितरूप सुविश्वरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 19

श्रीविष्णुनामगष्णुवर्णगसंधिगात्मन्

मंडूकसत्तनुजह्वस्वसुनामकेन ।

ध्यातर्षिणा सुसुखतीर्थकराब्जसेव्य

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 20

वैकुंठपूर्वकत्रिधामगतत्रिरूप

स्वक्ष्यादिधामगतविश्वपुरःसरात्मन् ।

सत्केशवादिचतुरुत्तरविंशरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 21

सत्पञ्चरात्रप्रतिपाद्यरमादिरूप-

व्यूहात्पुरासुपरिपूज्यनवस्वरूप ।

विमलादिशक्तिनवकात्मकदिव्यरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 22

स्वायंभुवादिमनुसंस्थित दिव्यराज-

राजेश्वरात्मक तथा सदुपेन्द्रनामन् ।

सर्वेषु राजसु निविष्टविभूतिरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 23

प्रद्युम्नपार्थनरवैन्यबलानिरुद्ध-

पूर्वेषु संस्थितविशेष विभूतिरूप ।

ब्रह्मादिजीवनिवहाख्यविभिन्नकांश

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 24

श्रीवेंकटेश हरिनामकव्यूह रङ्ग-

नाथाविमुक्तिगप्रयागगमाधवात्मन् ।

काञ्चीस्थसद्वरदराजत्रिविक्रमात्मन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 25

सत्पृश्निगर्भपितृहृद्यगयाप्रयाग-

वाराणसीस्थितगदाधरमाधवात्मन् ।

सच्छ्रीकराख्यहरिनामकव्यूहरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 26

सद्द्वारकारजतपीठसुवर्णपूर्व-

ब्रह्मण्यमध्यमठसंस्थितदिव्यमूर्ते ।

सत्पाजकस्थितगयास्थगदाधरात्मन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 27

वेदेशमद्गुरुकरार्चितपादपद्म-

श्रीकेशवध्रुवविनिर्मितदिव्यमूर्ते ।

श्रीभीमरथ्यमलतीरमणूरवासिन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 28

श्रीपांडुरङ्गसुस्यमन्तकगंडिकाश्री-

मुष्णादिक्षेत्रवरसंस्थितनैकमूर्ते ।

रूपैर्गुणैरवयवैस्तदितः स्वनन्त

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 29

अआदिक्षान्तततवर्णसुवाच्यभूतै-

र्निर्भेदमूर्तिकमहासदजादिरूपैः ।

शक्त्यादिभिर्विगतभेददशैकरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 30

सूर्यानलप्रभृतिहृद्दुरितौघतूल-

राशिप्रदाहकसुदर्शननामधेय ।

नारायणादिकसुपञ्चकदिव्यरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 31

इच्छादिशक्तित्रितयेन तथाऽणिमादि-

शक्त्यष्टकेनविगताखिलभेदमूर्ते ।

सन्मोचकादिनवशक्त्यविभिन्नकांश

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 32

जीवस्वरूपविनियामकबिम्बरूप

मूलेशनामक सुसारभुगिन्धरूप ।

प्रादेशरूपक विराडथ पद्मनाभ

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 33

क्षीराब्धिसङ्गतमहाजलपातृवाड-

वाग्निस्वरूप परमाणुगताणुरूप ।

अव्याकृताम्बरगतापरिमेयरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 34

ब्रह्मादिसर्वजगतः सुविशेषतो वी

सर्वत्र संस्थितिनिमित्तत एव चासः ।

व्यासः स वीति हि श्रुतेरिति व्यासनामन्

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 35

निर्दोषपूर्णगुणचिज्जडभिन्नरूप

श्रुत्या यतस्त्वधिगतोऽसि ततस्त्वनामन् ।

सच्छ्रीकराख्यहरिनामकव्यूहरूप

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 36

पैलौडुलोमिवरजैमिनिकाशकृत्स्न-

कार्ष्णाजिनिप्रभृतिशिष्यसुसेविताङ्घ्रे ।

कानीन मद्गुरुसुसेव्यपदाब्जयुग्म

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 37

नानाविकर्मजनिताशुभसागरान्तः

संभ्राम्यतः परिहतस्य षडूर्मिजालैः ।

पुत्रादिनक्रनिगृहीतशरीरकस्य

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 38

आशामदप्रभृतिसिंहवृकादिसत्वा-

कीर्णेऽटतो भवभयंकरकाननेऽस्मिन् ।

पञ्चेषुचोरहृतबोधसुवित्तकस्य

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 39

लक्ष्मीनिवास भवनीरविहीनकूप-

मध्यस्थितस्य मदभारविभिन्नबुद्धेः ।

तृष्णाख्यवारणभयेन दिगन्तभाजो

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 40

अज्ञानमोहपटलाद्गतचक्षुषोऽलं

मार्गान्निजात् स्खलत ईशदयाम्बुराशे ।

किंगम्यमित्यविरतं रटतो रमेश

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 41

आजन्मचीर्णबहुदोषिण ईश जातु

त्वत्पादनीरजयुगं हृदि कुर्वतोऽलम् ।

देवापराधमनवेक्ष्य च वीक्ष्य भक्तिं

वासिष्ठकृष्ण मम देहि करावलम्बम् ।। 42

आम्नायभारतपुराणसरःप्रभूत-

वासिष्ठकृष्णस्तुतिपंकजमालिकेयम् ।

देव त्वदर्थममलां रचितोचितां तां

कृत्वा ध्रियस्व हृदये भव भूतिदो मे ।। 43

वासिष्ठकृष्णपदपद्ममधुव्रतेन

वेदेशतीर्थगुरुसेवकयादवेन ।

हस्तावलम्बनमिदं रचितं पठेद्यः

तस्य प्रदास्यति करं बदरीनिवासी ।। 44

वेदेशतीर्थगुरुमानसनीरजस्थ-

श्रीमध्वहृत्कमलवासिरमानिवासः ।

प्रीतोऽस्त्वनेन शुभदो मम देवपूजा

व्याख्यादिसत्कृतिकृतो बदरीनिवासी ।। 45

।। इति श्रीमद्यदुपत्याचार्यविरचितं श्रीवेदव्यासकरावलम्बनस्तोत्रम् ।।